श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री नारायणपण्डिताचार्य विरचिता

# ॥ श्री नृसिंहस्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री नृसिंहस्तुतिः ॥

उदयरवि सहस्रद्योतितं रूक्षवीक्षं
    प्रलय जलधिनादं कल्पकृद्वह्नि वक्त्रम्।
सुरपतिरिपु वक्षश्छेद रक्तोक्षिताङ्गं
    प्रणतभयहरं तं नारसिंहं नतोऽस्मि॥

प्रलयरवि करालाकार रुक्चक्रवालं
    विरलय दुरुरोची रोचिताशान्तराल।
प्रतिभयतम कोपात्युत्कटोच्चाट्टहासिन्
    दह दह नरसिंहासह्यवीर्याहितं मे॥ 1॥

सरस रभस पादापात भाराभिराव
    प्रचकितचल सप्तद्वन्द्व लोकस्तुतस्त्वम्।
रिपुरुधिर निषेकेणेव शोणाङ्घ्रिशालिन्
    दह दह नरसिंहासह्यवीर्याहितं मे॥ 2॥

तव घन घन घोषो घोरमाघ्राय जङ्घा
    परिघमलघु मूरुव्याज तेजोगिरिं च।
घन विघटितमागाद्दैत्य जङ्घाल सङ्घो
    दह दह नरसिंहासह्यवीर्याहितं मे॥ 3॥

कटकि कटक राजद्धाट काग्र्यस्थलाभा
    प्रकट पटतटित्ते सत्कटिस्थातिपट्वी।
कटुक कटुक दुष्टाटोप दृष्टिप्रमुष्टौ
    दह दह नरसिंहासह्यवीर्याहितं मे॥ 4॥

प्रखर नखर वज्रोत्खात रूक्षारिवक्षः
शिखरि शिखर रक्तैराक्तसन्दोह देह।
सुवलिभ शुभ कुक्षे भद्र गंभीरनाभे
दह दह नरसिंहासह्यवीर्याहितं मे॥ 5॥

स्फुरयति तव साक्षात् सैव नक्षत्रमाला
क्षपित दितिज वक्षो व्याप्तनक्षत्रमार्गम्।
अरिदरधर जान्वासक्त हस्तद्वयाहो
दह दह नरसिंहासह्यवीर्याहितं मे॥ 6॥

कटुविकट सटौघोद्घट्टनाद्भ्रष्टभूयो
घनपटल विशालाकाश लब्धावकाशम्।
करपरिघ विमर्द प्रोद्यमं ध्यायतस्ते
दह दह नरसिंहासह्यवीर्याहितं मे॥ 7॥

हठलुठ दल घिष्टोत्कण्ठ दष्टोष्ठ विद्युत्
सट शठकठिनोरः पीठभित्सुष्ठु निष्ठाम्।
पठति नु तव कण्ठाधिष्ठ घोरान्त्रमाला
दह दह नरसिंहासह्यवीर्याहितं मे॥ 8॥

हृत बहुमिहि राभासह्यसंहाररंहो
हुतवह बहुहेति ह्रेपिकानन्त हेति।
अहित विहित मोहं संवहन् सैंहमास्यं
दह दह नरसिंहासह्यवीर्याहितं मे॥ 9॥

गुरुगुरुगिरिराजत्कन्दरान्तर्गतेवा
दिनमणि मणिशृङ्गे वान्तवह्निप्रदीप्ते।
दधदति कटुदंष्ट्रे भीषणोज्जिह्व वक्त्रे
दह दह नरसिंहासह्यवीर्याहितं मे॥ 10॥

अधरित विबुधाब्धि ध्यानधैर्यं विदीध्य -
द्विविध विबुधधी श्रद्धापितेन्द्रारिनाशम्।
विदधदति कटाहोद्घट्टनेद्धाट्टहासं
दह दह नरसिंहासह्यवीर्याहितं मे॥ **11** ॥

त्रिभुवन तृणमात्र त्राण तृष्णं तु नेत्र -
त्रयमति लघितार्चिर्विष्ट पाविष्टपादम्।
नवतर रवि ताम्रं धारयन् रूक्षवीक्षं
दह दह नरसिंहासह्यवीर्याहितं मे॥ **12** ॥

भ्रमद भिभव भूभृद्भूरिभूभारसद्भिद् -
भिदभिनव विदभ्रू विभ्र मादभ्र शुभ्र।
ऋभुभव भय भेत्तर्भासि भो भो विभोऽभिः
दह दह नरसिंहासह्यवीर्याहितं मे॥ **13** ॥

श्रवण खचित चञ्चत्कुण्ड लोच्चण्डगण्ड
भ्रुकुटि कटुललाट श्रेष्ठनासारुणोष्ठ।
वरद सुरद राजत्केसरोत्सारि तारे
दह दह नरसिंहासह्यवीर्याहितं मे॥ **14** ॥

प्रविकच कचराजद्रत्न कोटीरशालिन्
गलगत गलदुस्रोदार रत्नाङ्गदाढ्य।
कनक कटक काञ्ची शिञ्जिनी मुद्रिकावन्
दह दह नरसिंहासह्यवीर्याहितं मे॥ **15** ॥

अरिदरमसि खेटौ बाणचापे गदां सन् -
मुसलमपि कराभ्यामङ्कुशं पाशवर्यम्।
करयुगल धृतान्त्रस्रग्विभिन्नारिवक्षो
दह दह नरसिंहासह्यवीर्याहितं मे॥ **16** ॥

चट चट चट दूरं मोहय भ्रामयारीन्
    कडि कडि कडि कायं ज्वारय स्फोटयस्व।
जहि जहि जहि वेगं शात्रवं सानुबन्धं
    दह दह नरसिंहासह्यवीर्याहितं मे॥ 17 ॥

विधिभव विबुधेश भ्रामकाग्नि स्फुलिङ्ग
    प्रसवि विकट दंष्ट्रोज्ज्जिह्ववक्त्र त्रिनेत्र।
कल कल कलकामं पाहिमां ते सुभक्तं
    दह दह नरसिंहासह्यवीर्याहितं मे॥ 18 ॥

कुरु कुरु करुणां तां साङ्कुरां दैत्यपोते
    दिश दिश विशदां मे शाश्वतीं देवदृष्टिम्।
जय जय जय मुर्तेऽनार्त जेतव्य पक्षं
    दह दह नरसिंहासह्यवीर्याहितं मे॥ 19 ॥

स्तुतिरियमहितघ्नी सेवितानारसिंही
    तनुरिवपरिशान्ता मालिनी साऽभितोऽलम्।
तदखिल गुरुमाग्र्य श्रीदरूपा लसद्भिः
    सुनिय मनय कृत्यैः सद्गुणैर्नित्ययुक्ताः॥ 20 ॥

लिकुच तिलकसूनुः सद्धितार्थानुसारी
    नरहरि नुतिमेतां शत्रुसंहार हेतुम्।
अकृत सकल पापध्वंसिनीं यः पठेत्तां
    व्रजति नृहरिलोकं कामलोभाद्यसक्तः॥ 21 ॥

॥ श्री नृसिंहस्तुतिः समाप्ता ॥